International Journal of Sanskrit Research 2021; 7(1): 360-363

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 360-363
© 2021 IJSR
www.anantaajournal.com
Received: 04-11-2020
Accepted: 06-12-2020

**विष्णुपदसाहुः**
शोधछात्रः, श्री जगन्नाथ संस्कृत विश्वविद्यालयः, ओडिशा, भारत

**Corresponding Author:**
**विष्णुपदसाहुः**
शोधछात्रः, श्री जगन्नाथ संस्कृत विश्वविद्यालयः, ओडिशा, भारत

# सांख्यानां नये प्रकृतिः तस्याः प्रभावश्च

## विष्णुपदसाहुः

## प्रस्तावना

दर्शन-शब्दोऽयं प्रेक्षणार्थकाद् दृश् धातोः (दृशिर् प्रेक्षणे) 'करणाधिकरणयोश्च' इति सूत्रेण करणे ल्युट् प्रत्यये अनादेशे च कृते दर्शनम् इति पदम् सिद्धम्। 'दृश्यते अनेन इति दर्शनम्' उपनिषत्सु सत्यस्य दर्शनाय दृश् धातोः प्रयोगः अभवत्। अर्थात् ज्ञानचक्षुषा आत्मा इत्यादिनि यानि आलौकिकवस्तूनि गृह्यन्ते तद् दर्शनम्। येन माध्यमेन इदं विश्वम्, ब्रह्मा, जीवात्मा प्रकृतिश्च यथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते च तद् दर्शनम्। पुनश्च येन माध्यमेन सांसारिकाणां पदार्थानां स्वरुपं ज्ञायते तद् एव दर्शनम्। सर्वमपि आध्यात्मिकं आधिभौतिकं च विवेचनं दर्शन-शब्दान्तर्गतं भवति। केचन् दार्शनिकाः दर्शनशब्दस्यार्थं कुर्वन्ति तत्त्वशास्त्रम् तत्त्वविज्ञानम् वा। दृश्यते तत्त्वम् आत्मस्वरुपम् ब्रह्मरुपं वा तत्त्वं येन तद् दर्शनम्। यथोक्तम्- 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यो निदिध्यासितव्यः। मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्।' (वृह.उप)

सम्पूर्णेऽस्मिन् भारते दर्शनशास्त्रस्य भागद्वयं वर्तते – आस्तिकदर्शनम् नास्तिकदर्शनम् च। न्यायदर्शनम् (गौतमेन), वैशेषिकदर्शनम् (कणादेन), सांख्यदर्शनम् (कपिलेन), योगदर्शनम् (पतञ्जलिना), पूर्वमीमांसा (जैमिनिना), उत्तरमीमांसा (व्यसेन), एतानि षड्दर्शनानि आस्तिकदर्शनानि। शास्त्रप्रतिपादितानि तत्त्वान्येन, पारमार्थिकानि सन्तीइति यानि दर्शनानि प्रतिपादयन्ति तानि दर्शनानि आस्तिकदर्शनशब्देन अभिधीयन्ते। एतेषु षडास्तिकदर्शनेषु अन्यतमं भवति सांख्यदर्शनम्। सांख्य शब्दः 'सम्' उपसर्गपूर्वकं चक्षिञ् धातोः अण् प्रत्ययेन निष्पन्नः। अस्यार्थः 'सम्यक् ख्यानम्' इति। अत्र प्रकृति-पुरुषयोः विवेकविचारः, गुणत्रयविचारः, पुरुषस्वरुपविचारः, महदहंकारादीनां च सम्यग् विवरणं समुपलभ्यते। अमरकोशकारस्य मते तु 'संख्या' शब्दस्यार्थः चर्चा विचारणा वाऽस्ति। रामतीर्थभट्टाचार्यमहोदयः सांख्य शब्दस्य परिभाषारुपेण लिखति – 'पंचविंशतिस्तत्त्वानां विचारः सांख्यम्, तमधिकृत्य कृतो ग्रन्थः सांख्यमुच्यते।' सांख्यदर्शने पञ्चविंशतितत्त्वानि स्वीकृतानि। तेषु अन्यतमा प्रकृतिः। मम प्रवन्धस्य आलोच्यविषयः प्रकृतिः। प्रकृतिरियं मूलप्रकृतिः रुपेणापि गण्यते – 'संज्ञा खल्वियं प्रधानस्य मूलप्रकृतिरिति।' [1] सांख्यदर्शने सामान्यं विशेषलक्षणश्च आलोच्यते। विशेषलक्षणस्य आलोचनायाः पूर्वं सामान्यक्षणस्य आलोचनायाः प्रयोजनं वर्तते। 'प्रकृतिः' शब्दस्य व्युत्पत्तिलभ्यार्थः 'प्रारब्धा कृतिरस्या।'

अर्थात् यस्मात् कार्याणाम् अभिव्यक्तं भवति तदेव प्रकृतिः। साम्यावस्थायां कार्याणाम् अभिव्यक्तं न भवति, वैसम्यावस्थायां भविष्यति। अतः रतीतीर्थमुनिना उक्तम् - 'प्रकृतित्त्वं नाम कार्याकारेण विक्रियमानत्वम्।' [2] यतो हि सांख्यस्य सत्त्वरजस्तमोगुणात्मिका- प्रकृतिरपि महदादिरुपेण विकारं लभते, अतः लक्षणानुसारेण प्रकृतित्वं सम्बुध्यते। किन्तु यदि वैसम्यावस्थायां प्रकृतिः स्वीकार्यते, तर्हि कपिलदर्शनेन सह विरोधः भविष्यति, कपिलदर्शने गुणत्रयाणां साम्यावस्थायां प्रकृतिरुपेण स्वीकार्यते – 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः।' [3] विरोधे सति व्युत्पत्तिगतलभ्यार्थेण इदं ज्ञायते यत् प्रकृतिरिति शब्देन उपादानकारणम् एव अवबोध्यते। यदि केवलं उपादानकारणम् एव प्रकृतिः भविष्यति, तर्हि घट-प्रभृतिनां उपादानकारणम् अपि मृत्तिकानां प्रकृतित्त्वप्रसङ्गं दृश्यते। अतः एतत् दोषं निवारणाय वाचस्पतिमिश्रेण प्रकृतेः सामान्यलक्षणरुपेणोक्तम् – 'तत्त्वान्तरोपादानत्वं च प्रकृतित्त्वम्।' [4] एतेनोक्तदोषस्य निवारणं भवति, यतो हि घटेत्यादिनां उपादानकारणम् मृत्तिकायाः भिन्नं तत्त्वं न भवति। अर्थात् येषु पदार्थेषु समानधर्म सन्ति ते कदापि तत्त्वान्तरं न भवन्ति, ते भिन्नं तत्त्वं न भवन्ति। अत्र सामान्यरुपेण प्रश्नम् आगमिष्यति, यतो हि महत्-तत्त्वे महतः च विकारेषु अहंकारादितत्त्वेषु सुक्ष्मत्वं अतीन्द्रियत्वादिरुपं समधर्मं विद्यते तर्हि कथं तत्त्वान्तरं भविष्यति? महत्त्वादि-तत्त्वेषु महत्त्वादि जातिः वर्तते, किन्तु विकारेषु अहंकारादितत्त्वेषु न अस्ति। अतः वाचस्पतेः दोषनिवारणप्रसङ्गेन वलराममोदासीना उक्तम् - 'स्थूलत्वेन्द्रियग्राह्यत्वसहकृत पदार्थविभाजक पृथिवीत्वरूपोपाधेः पृथिवीघटयोरुभयोरुभयोरपि वृत्तित्वेन तयोः समानधर्मवत्त्वान्न घटादेः पृथिव्यास्तत्त्वान्तर- त्वमित्यर्थे तात्पर्येणोक्तदोषाभावात्।' [5] अतः वयासदेवऽपि योगभाष्ये विशेषसंज्ञकतत्त्वानां अर्थात् एकादशेन्द्रियाणां पञ्चमहाभूतानां च तत्त्वानां व्यतिरिक्तं न अन्यकिमपि तत्त्वान्तरं स्वीकुर्वन्ति - 'न विशेषेभ्यः परं तत्त्वान्तरमस्तीति।' [6]

सांख्यदर्शने महत्-अहंकार-पञ्चतन्मात्रञ्च यथा प्रकृतिरुपेण गण्यते तथैव विकृतिरुपेणापि प्रतिपाद्यते - 'मह- दाद्याः प्रकृतिविकृतयः सप्त।' [7] महत्-तत्त्वमहङ्कारस्य प्रकृतिः विकृतिश्च मूलप्रकृतेः, एवमहंकारतत्त्वं तन्मात्राणाम् इन्द्रियाणां च प्रकृतिः, विकृतिश्च महतः, एवं पञ्च तन्मात्राणि तत्त्वानि भूतानाम् आकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्य।' [8] अतः वाचस्पतिमहोदयेन कृतं लक्षणं न केवलं प्रकृतिः, महत्-प्रभृतिषु सप्तविकारेषु अपि अतिव्यप्त अभवत्। किन्तु या प्रकृतिः कदापि कस्यापि तत्त्वस्य विकारः न भवति, तस्याः प्रकृतेः लक्षणस्य आवश्यकता वर्तते। अतः प्रसिद्ध-सांख्याचार्येण विज्ञानभिक्षुना मूलप्रकृतेः लक्षणप्रसङ्गेन उक्तम् - 'तत्र प्रकृतित्वं साक्षात्परम्परयाखिलविकारोपादानत्वम्।' [9] विज्ञानभिक्षोः लक्षणम् अनुसरणं कृत्वा सांख्यतत्त्वप्रदीपे प्रकृतेः लक्षणविषये उक्तम् -'जगदुपादानकारणं प्रकृतिः।' तत्र चोक्तम् इदम् एव प्रकृतेः तटस्थलक्षणम्। सांख्यतत्त्वप्रदीपकारेण तटस्थलक्षणप्रसङ्गेनोक्तम् - 'तटस्थलक्षणं तु जगदुपादानकारणं प्रकृतिरिति।' [10] वेदान्तपरिभाषायाम् तटस्थलक्षणप्रसङ्गेनोक्तम् - 'तटस्थलक्षणं नाम यावलक्षस्य कालमनवस्थितत्वे सति यत् व्यवर्तकं तदेव।' [11]

वयं जानीमः वैषम्यं विना उत्पत्तिः असम्भवः। अतः महत्-प्रभीतितत्त्वानां उत्पत्तिसमये सत्त्वः रजः तमश्च इति गुणत्रयाणां साम्यावस्थां न सन्ति। परन्तु सांख्यशास्त्रे गुणत्रयाणां साम्यावस्थां जगतः उपादानरूपेण परिदृश्यते, सा एव प्रकृतिश्च - 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः।' [12] अतएव साम्यावस्थारुपः यः जगदुपादानत्वधर्मः, जगदुपादानत्वधर्मरुपा या शक्तिः, सा एव प्रकृतिः। व्रह्मवैवर्तपुराणे अपि प्रकृति-विषये उक्तम् -

प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता।। [13]

अत्र सृष्टेः आदिरुपेण प्रकृतेः प्राधान्यं परिदृश्यते –

प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता।। [14]

सृष्टिविषये सांख्यदर्शनेन सह पुराणस्य प्रकृतेः सादृश्यं वर्तते। ईश्वरकृष्णस्याभिप्रेतः प्रकृतेः लक्षणम् –

मूलप्रकृतिर्विकृतिः महदाद्याः प्रकृतिर्विकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।। [15]

अत्र लक्षणे 'प्रकृतिः' इति पदस्य प्रयोजनम् किम् अस्ति? सांख्या सत्कार्यवादीनः। अत्र प्रकृतित्वप्रसङ्गः असिद्धः भवेत्, यतो हि कार्यं स्वोत्पत्तिपूर्वमेव कारणे वर्तते। अतएव तस्य कार्योत्पादकस्य उपादानम् किम्? आत्मेत्यादिनां सप्तपदार्थानां कदापि उत्पादनं सम्भवं न भवति। परन्तु 'प्रकरोति इति प्रकृतिः' [16] इति व्युत्पत्यानुसारेण सर्वकार्योत्पादने सक्षमं उपादानं प्रकृतिः एव। अस्यापत्तेः उत्तरप्रसङ्गेन इदम् वक्तव्यम् अस्ति यत् आत्माप्रभृतिरिव

सत्पदार्थानां उत्पत्तिः असम्भवम् – इदं तत्त्वं सत्यम्, किन्तु गगनकुसुममिव असत्पदार्थानां उत्पत्तिरपि असम्भवम्। अतः सत्कार्यवादिनां सांख्यानामभिप्राय उत्पत्तिरियं उपादानकारणे सुक्ष्मरुपेण विद्यमानपदार्थानां स्थूलरुपेण प्रकाशः। अतएव सुक्ष्मरुपेण उपादाने विद्यमानकार्यं स्थूलरुपेण प्रकाशकर्तुं सक्षमोपादानमेव प्रकृतिः। सांख्यसूत्रेऽपि प्रकृतेः लक्षणप्रसङ्गेनोक्तम् - 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः।' [17] वाचस्पतिमिश्रः अपि प्रकृतेः अनुरुपलक्षणं स्वीकरोति - 'प्रकरोतीति प्रकृतिः प्रधानम्, सत्त्वरजस्तमसां साम्यावस्था।' [18] सांख्यतत्त्वविवेचनादि ग्रन्थेऽपि अनुरुपलक्षणस्य प्रतिपादनं भवति। तद् यथा –

1. साम्यावस्था गुणानां या प्रकृतिः सा स्वभावतः। [19]
2. गुणत्रयसाम्यावस्था प्रकृतिः। [20]
3. प्रधानं सत्त्वरजस्तमसां साम्यावस्था। [21]
4. प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था। [22]

अत्रोल्लिखितः सत्त्वप्रभृतयः पदार्थाः वैशेषिकानां द्रव्यपदार्थाः, न तु गुणपदार्थाः। सत्त्वप्रभृतयः पदार्थाः संयोग-विभाग-चलत्व-प्रभृतयः गुणविशिष्टाः - 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः' इत्यादि सांख्यसूत्रे सत्वादीनि द्रव्यानि न वैशेषिका गुणाः संयोगविभागवत्त्वल्लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च।' [23] परन्तु सांख्याः एते सत्त्वप्रभृति-पदार्थान् गुणरुपेण स्वीकुर्वन्ति।

अत्र सत्त्वं सुखात्मकम्; यस्मिन् सति न कुतश्चिद् भयमुत्पद्यते न कस्यामप्यवस्थायां विषादः समुपजायते तत् सत्त्वम्। सत्त्वस्य प्रयोजनं प्रकाशकरणम्। रजो दुःखात्मकम्; रजो दुःखस्य कारणं रागद्वेषात्मकत्वात्। रजसः प्रयोजनं प्रवृत्तिकरणम्। तमश्च मोहात्मकम्; तमो मोहस्य हेतुर्मोहात्मकत्वात्। त्रिगुणानां प्रयोजनमुक्त्वा क्रियाम् उच्यते - 'अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।' अर्थात् अन्ययोः अभिभवं कृत्वा एकः समुत्तिष्ठतीति अन्योन्याभिभवः। तथा हि सत्त्वं रजस्तमसी अभिभूय शान्तात्मनोवृत्तिं लभते। इत्थं न हि ते परस्पर विरोधशीलाः गुणाः, अपितु विरोधक्रियायाः प्रागेव एकक्रियाकर्तृतया परस्परं पूरकत्वं सञ्जायते। अर्थात् पुरुषस्य कैवल्यलाभार्थं तेषां परस्पर विरोधिनां सहकारित्वं सञ्जायते।

## सन्दर्भ

1. युक्तिदीपिका – पत्राङ्कः - 25
2. वैयासकन्यायमालाव्याख्या – पत्राङ्कः – 64
3. सांख्यदर्शनम् – 1/61
4. सांख्यतत्त्वकौमुदी, सांख्यकारिका – का. 3
5. विद्वत्तोषिणी, सांख्यतत्त्वकौमुदी, सांख्यकारिका – का. 3
6. योगभाष्य, योगसूत्र – 2/19
7. सांख्यकारिका – का. 3
8. सांख्यतत्त्वकौमुदी, सांख्यकारिका – का. 3
9. सांख्यसारः, पूर्वभागः, तृतीयपरिच्छेदः
10. सांख्यतत्त्वप्रदीपः - पत्राङ्कः – 141
11. वेदान्तपरिभाषा – पत्राङ्कः – 281
12. सांख्यसूत्र – 1/61
13. व्रह्मवैवर्तपुराणम् – प्रकृतिखण्डः, अङ्कः – 1, शलोकः – 5
14. व्रह्मवैवर्तपुराणम् – प्रकृतिखण्डः, अङ्कः – 1, शलोकः – 8
15. सांख्यकारिका – का. 3
16. युक्तिदीपिका – पत्राङ्कः - 26
17. सांख्यसूत्र – 1/61
18. सांख्यतत्त्वकौमुदी, सांख्यकारिका – का. 3
19. सांख्यतत्त्वविभाकरः, सांख्यसंग्रहः - पत्राङ्कः – 15
20. सांख्यतत्त्वविभाकरः, सांख्यसंग्रहः - पत्राङ्कः – 30
21. सांख्यतत्त्वप्रदीपः, सांख्यसंग्रहः - पत्राङ्कः – 153
22. तत्त्वमीमांसा, सांख्यसंग्रहः - पत्राङ्कः – 182
23. सांख्यप्रवचनभाष्य, सांख्यसूत्र – 1/61

## सहायकग्रन्थावली

1. तत्त्वमीमांसा वाचस्पतिमिश्रः चौखाम्वा संस्कृत सीरिज, नं-286।
2. (सांख्यसंग्रहे सन्निवेशितः)
3. वेदान्तपरिभाषा धर्मराजाध्वरीन्द्रः अनन्तकृष्णशास्त्रिमहोदयेन सम्पादितः कलिकाताविश्वविद्यालयः – 1930।
4. वैयासकन्यायमाला भारतीतीर्थमुनिः षष्ठावृत्तिः, आनन्दाश्रमग्रन्थावलिः, ग्रन्थाङ्कः – 23, आनन्दाश्रममुद्रणालयः, पुना – 1966।
5. योगभाष्यः व्यासदेवः गोस्वामिदामोदरशास्त्रिमहोदयेन सम्पादितः, काशीसंस्कृत सीरिज पुस्तकमाला - 110, चौखाम्वा संस्कृत सीरिज, वेनारस, 1935।
6. योगसूत्रः महर्षिः पतञ्जलिः गोस्वामिदामोदरशास्त्रिमहोदयेन सम्पादितः,

काशीसंस्कृत सीरिज पुस्तकमाला - 110, चौखाम्वा संस्कृत सीरिज, वेनारस, 1935।
7. सांख्यकारिका ईश्वरकृष्णः स्वाम्यात्मस्वरूपोदासीनमहोदयेन सम्पादितः शकाव्दः – 1852, संवत् – 1987, गया।
8. सांख्यतत्त्वकौमुदी वाचस्पतिमिश्रः तारानाथ तर्कवाचस्पतिमहोदयेन सम्पादितः, कलिकाता, 1987।
9. सांख्यतत्त्वविभाकरः वंशीधरमिश्रः Chowkhamba Sanskrit series, Ed. Nyayacharya Sri Rama Sastri Bhandari, Beneras, 1921
10. सांख्यतत्त्वप्रदीपः हीरेन्द्रनाथदत्तः कलिकाता, सन्-1346, चौखाम्वा संस्कृत सीरिज, नं – 286, 1920
11. सांख्यदर्शनम् महर्षिः कपिलः षष्ठ-संस्करणम्, मः मः दुर्गाचरण सांख्य-वेदान्ततीर्थेन सम्पादितः, कलिकाता – 1360।
12. सांख्यप्रवचनभाष्य विज्ञानभिक्षुः षष्ठ-संस्करणम्, मः मः दुर्गाचरण सांख्य-वेदान्ततीर्थेन सम्पादितः, कलिकाता – 1360।
13. सांख्यसारः विज्ञानभिक्षुः श्रीकालिपदतर्काचार्यमहोदयेन सम्पादितः छात्र-पुस्तकालयः, कलिकाता – 1930